दव्यागमे ।
"अमावास्यामर्द्धरात्रे दक्षिणां पूजयेत्पराम् ।
कुलवृक्षे च यः कुर्य्यात् स गच्छेच्छिवसन्नि-
धिम् ॥
तुलायां भौमवारे च अमावास्या यदा भवेत् ।
तिथिः सापि महापुण्या शिवेन परिकीर्त्तिता ॥
वर्षैश्चतुर्भिर्यत् पुण्यं विधिवत् पूज्य चण्डिकाम्
तत्फलं लभते वीर अमावास्यां निशार्द्धके ॥"
कालीकुलतन्त्रे ।
"निशार्द्धे पूजयेद्देवीं श्मशानालयवासिनीम् ॥"
इति ॥
मालिनीतन्त्रे ।
"एतत्सन्ध्यात्रयेणैव अर्द्धरात्रौ तु वन्दना ।
महारात्रावपि तथा कार्य्या देशिकसत्तमैः ॥"*
स्वापकालो यथा,—
श्रीदेव्युवाच ।
"देवदेव महादेव संसारार्णवतारक ।
देवतायाः स्वापकालं कथयस्व दयानिधे ॥
श्रीशिव उवाच ।
चतुर्द्दण्डात् परं देवि रात्रेः प्रथमयामकः ।
स्वापकालस्तु कथितः पूजानर्थफलप्रदा ।
पूजा होमस्तोत्रनती जाग्रत्काले प्रशस्यते ॥"
इति कालीकुलामृततन्त्रे ॥*॥
"समुद्रमथने देवि देवासुरगणाः पुरा ।
नाराध्य त्वां प्रमथ्नीयुरतस्त्वं विषरूपिणी ॥
आविर्भूता महाकाली ब्रह्माण्डनाशनाशिनी ।
तद्दृष्ट्वा देवा दैत्याश्च भीता मां शरणं गताः ॥
तेषामपि भयं दृष्ट्वा भीतोऽहं विषसन्निधौ ।
गत्वा ध्यानपरो भूत्वा विषं पातुं समारभे ॥
पूर्व्वोक्ता या महाविद्या आविर्भूता च मे
इति ।
तुलां कुह्वां निशार्द्धे च देवदानवनिद्रिते ॥
मनुष्यपशुपक्ष्यादौ निद्रिते चान्यजन्तुषु ।
तस्मिन् काले मया पूज्या इन्द्रेणाप्यसुरेण तु ॥
देव्युवाच ।
कुत्र काले त्वया पूज्या इन्द्रेणाप्यसुरेण च ॥
महादेव उवाच ।
अर्द्धरात्रान्मुहूर्त्ते च मया चेन्द्रेण पूजिता ।
ततो मुहूर्त्तं संपूज्य वैरिणाप्यसुरेण च ॥
अत आद्यः पाशवः स्यात् वैरः शेषः प्रकी-
र्त्तितः ।
स्वायम्भुवेन मनुना मर्त्त्ये तेन प्रपूजिता ॥"
इति गोप्यगोपनलीलागमे ६ पटलः ॥*॥
कालीकुलसर्व्वस्वे ।
"निशार्द्धे सा तिथिर्नास्ति तदूर्द्ध्वं भूतसंयुता ।
तत्रापि पूजयेद्देवीं भूतयुक्तां न लङ्घयेदिति ॥"
अथ रक्षाकालीपूजाप्रमाणम् । उत्तरकामाख्या-
तन्त्रे ।
"मारीभये समायाते दुर्भिक्षभयपीड़िते ।
पूजयेत् परया भक्त्या कालीं कालविनाशिनीम् ॥
रक्षणात् सर्व्वभूतानां रक्षाकालीति सा
स्मृता ॥"
ज्ञानार्णवे ।
"सर्व्वविघ्नोपशान्त्यर्थं रक्षाकालीं प्रपूजयेत् ।
शनिमङ्गलवारे च प्रदोषे पूजयेत् शिवाम् ॥
चतुर्द्दश्याममायां वा नवम्यामष्टमीतिथौ ।
पूजनात् वरदा काली यथेप्सितफलप्रदा ॥"
कालीकुलसर्व्वस्वे ।
"निशामुखे महेशानी काली रक्षार्थमादरात्
पूजनीया नृभिः सर्व्वैरुपचारसमन्वितैः ।
वित्तशाठ्यं न कर्त्तव्यं यथाविभवविस्तरैः ॥"
निरुत्तरतन्त्रे ।
"बलिदानन्तु विधिवत् मधुभिः पायसेन च ।
पूपैर्म्मोदकसंघैश्च पृथुकैः श्रीफलैरपि ॥
नानाफलैः शाकसूपैः पञ्चतत्त्वैर्महेश्वरीम् ।
पूजयेद्विघ्नशान्त्यर्थं कालीं रक्षाविधायिनीम् ॥
प्रदोषसमये पूजा कर्त्तव्या भूतिमिच्छता ।
रात्रौ विसर्ज्जनं कार्य्यं क्रीड़ाकौतुकमङ्गलैः ॥
भैरवतन्त्रे ।
"अथ वक्ष्ये महेशानि घोरे मारीभये तथा ।
औत्पातिके च दुर्भिक्षे युद्धे राष्ट्रभयागते ।
पूजां कुर्य्यात् महाकाल्या रक्षार्थं पञ्चपर्व्वसु ॥
प्रदोषकाले संपूज्य निशायान्तु विसर्ज्जयेत् ।
मुहूर्त्तद्वितयं कालः प्रदोषोऽस्तमयात्ततः ॥",
तन्त्रान्तरे ।
"निशामुखे महाकालीं महामारीभये शिवाम्
कालीं त्रैलोक्यरक्षार्थं पूजयेत् रक्षणात्मि-
काम् ॥"* ॥
अथ फलहारीपूजाप्रमाणम् ।
"मधुमासे सिताष्टम्यां वैशाखचितयेऽहनि ।
पौर्णमास्यां तथा ज्यैष्ठे अमायाञ्च महेश्वरि ॥"
इत्यादि ।
"आमायां कार्त्तिके चैव नवम्यां शुक्लपक्षके ।"
इति कात्यायनीतन्त्रे ७८ पटलः ॥
"ज्यैष्ठे मासि तथामायां सफलं कालिकार्च्च-
नम् ।"
इत्युत्तरकामाख्यातन्त्रे ११ पटलः ॥
"ज्यैष्ठे मासि अमायां वै मध्यराते महेश्वरि ।
पूजयेत् कालिकां देवीं नानाद्रव्योपहारकैः ॥
तत्रैव सितपक्षे तु पञ्चदश्यां निशार्द्धके ।
पूजयेच्च फलैर्लक्षैः शक्तितो वापि कालिकाम् ॥"
इति मायातन्त्रे २७ पटलः ॥
अथ रटन्तीपूजाप्रमाणम् ।
"माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्द्दशी ।
तस्यां निशार्द्धसमये पूजयेन्मुण्डमालिनीम् ॥"
इति मायातन्त्रे १७ पटलः ॥
"मकरस्थे रवौ कृष्णचतुर्द्दश्यां निशार्द्धके ।
पूजयेद्दक्षियां कालीं धर्म्मकामार्थसिद्धये ॥"
इत्युत्तरकामाख्यातन्त्रे ८ पटलः ॥
श्यामाकः, पुं, (श्यामं श्यामवर्णमकतीति । अक
गतौ + अण् ।) तृणधान्यभेदः । श्यामा इति
भाषा । तत्पर्य्यायः । श्यामकः २ श्यामः ३
त्रिबीजः ४ अविप्रियः ५ सुकुमारः ६ राज-
धान्यम् ७ तृणबीजोत्तमः ८ । अस्य गुणाः ।
मधुरत्वम् । तिक्तत्वम् । कषायत्वम् । लघुत्वम् ।
शीतलत्वम् । वातकारित्वम् । कफपित्तव्रणदोष-
नाशित्वम् । सुग्राहित्वञ्च । इति राजनिर्घण्टः ॥
अपि च ।
"श्यामाकः शोषणो रूक्षो वातलः कफपित्त-
हृत् ॥"
इति भावप्रकाशः ॥
श्यामाङ्गः, पुं, (श्यामानि अङ्गानि यस्य । बुध-
ग्रहः । इतित्रिकाण्डशेषः ॥ कृष्णकलेवरे, त्रि
यथा,—
"श्यामाङ्गीं शशिशेखरां निजकरैर्दानञ्च रक्तो-
त्पलं
रत्नाढ्यं चषकं परं भयहरं संबिभ्रतीं शाश्व-
तीम् ।
मुक्ताहारलसत्पयोधरनतां नेत्रत्रयोल्लासिनीं
वन्देऽहं सुरपूजितां हरवधूं रक्तारविन्द-
स्थिताम् ॥"
इति तन्त्रसारे भुवनेश्वरीध्यानम् ॥
श्यामाक्षी, स्त्री, (श्यामा चासौ अक्षी चेति
कर्म्मधारयः ।) नीलाक्षी । इति राज-
निर्घण्टः ॥
श्यालः, पुं, (श्यायते नर्म्मार्थं प्राप्यतेऽसौ इति ।
श्यै + बाहुलकात् कालन् ।) पत्नीभ्राता ।
इत्यमरः ॥ शाला इति भाषा ॥ (यथा, गीता-
याम् । १ । ३४ ।
"मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिन-
स्तथा ।
एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ॥")
तत्पर्य्यायः । वाकीरः २ श्यालिकः ३ । इति
शब्दरत्नावली ॥ श्वशुर्य्यः ४ आलवीरः । इति
जटाधरः ॥ तन्मरणे एकरात्राशौचं यथा ।
आचार्य्यपत्नीपुत्त्रोपाध्यायमातुलश्वशुरश्वशुर्य्य-
सहाध्यायिशिष्येष्वेकरात्रेणेति । इति शुद्धि-
तत्त्वम् ॥ दन्त्यसादिश्च । (भगिनीपतिः । यथा,
ब्रह्मवैवर्त्ते । १ । १० । १५१ ।
"भग्नी पुत्त्री भागिनेयी भ्रातृपुत्त्रश्च भ्रातृजः
श्यालस्तु भगिनीकान्तो भगिनीपतिरेव ॥")
श्यालकः,पुं, श्याल एव । स्वार्थे कन् ।) श्यालः ।
इति रत्नावली ॥ (यथा, ब्रह्मवैवर्त्ते । १ ।
१० । १४९ ।
"पत्नीभ्राता श्यालकश्च पत्नीभग्नी च
श्यालिका ॥")
श्यालिका, स्त्री, पत्न्या भगिनी । शाली इति
भाषा । तत्पर्य्यायः । (श्याली २ केलिकुञ्चिका ३
इति शब्दरत्नावली ॥ (यथा, ब्रह्मवैवर्त्ते ।१।
१० । १४९ ।
"पत्नीभ्राता श्यालकश्च पत्नीभग्नी च
श्यालिका ॥")
श्यावः, पुं, (श्यै + बाहुलकात् वः ।) कपिशः ।
इत्यमरः ॥ स तु कृष्णपीतमिश्रवर्णः । इति
भरतः ॥ तद्युक्ते, त्रि ॥ (यथा बृहत्संहि-
तायाम् । ४ । २९ ।